स्त्रीसौभाग्यविवर्द्धिनी मदकरी ज्ञेया सदा वल्लभा
गुल्माध्मानविबन्धजिच्च कथिता सा मालवे तु
स्थिता ॥
अन्या पुष्कलिका नाम कषायोष्णा कटुस्तथा ।
मलापकर्षा कण्ठस्य पित्तच्छ्लेष्मातनाशिनी ॥
द्वैपदीया कटुस्तीक्ष्णा हृद्या दीर्घदला च सा ।
कफवातहरा रुच्या कटुर्दीपनपाचनी ॥"
इति राजनिर्घण्टः ॥

नागवारिकः, पुं, ( नागानां हस्तिनां वारो वारणम् । स कार्य्यत्वेनास्त्यस्येति । नागवार + ठन् । ) राजकुञ्जरः । हस्तिपः । गणस्यराजः । ( नागानां सर्पाणां वारो वारणमस्त्यस्येति । ) गरुडः । मयूरः । इति मेदिनी । के, २३० ॥

नागवीटः, पुं, ( नाग इव विशेषेण एटति इतस्ततो भ्रमतीति । वि + इट गतौ + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । ) टाङ्करः । इति त्रिकाण्डशेषः ॥ चाकरा इति ख्यातः ॥

नागवीथी, स्त्री, ( नागस्येव वीथी पन्थाः । ) अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषः । यथा,—
"सर्व्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥
तदेव मध्योत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथाहि त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथाचोक्तम् ।
अश्विनी कृत्तिका याम्या नागवीथीति
शब्दिता ॥"
इति विष्णुपुराणे । २ । ८ । ७६ श्लोकटीकायां श्रीधरस्वामी ॥ कश्यपापत्यविशेषः । यथा,—
"नागवीथी च यामिन्याम् ।" इति ब्रह्मपुराणे द्वितीयोऽध्यायः ॥ ( धर्म्मस्य यामिपत्नीगर्भजाता कन्या । यथा, मत्स्यपुराणे । ५ । १८ ।
"लम्बायां घोषनामानो नागवीथी तु यामिजा ॥")

नागमुण्डी, स्त्री, ( नागस्य मुण्डवत् आकृतिरस्त्यस्येति । अच् । ततो गौरादित्वात् ङीष् । ) डङ्गरीफलम् । इति राजनिर्घण्टः ॥

नागसम्भवं, क्ली, ( नागात् सीसकात् सम्भवो यस्य । ) सिन्दूरम् । इत्यमरः । २ । ६ । १०५ ॥

नागसुगन्धा, स्त्री, ( नागस्येव सु शोभनो गन्धो यस्याः । ) भुजङ्गाक्षी । सर्पसुगन्धा । इति भरतधृतस्वामी ॥ ( रास्नाभेदः । तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागस्तोकं, क्ली, ( नागस्य नागविषस्य स्तोकः स्वल्पता यत्र । कप् । स्थावरविषत्वादेवास्य तथात्वम् । ) वत्सनाभः । इति राजनिर्घण्टः ॥

नागस्फोता, स्त्री, ( नाग इव स्फोता । ) दन्ती । नागदन्ती । इति राजनिर्घण्टः ॥

नागहनुः, पुं, ( नागस्य हस्तिनो हनुरिव । ) नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

नागहन्त्री, स्त्री, ( नागान् हन्तीति । हन + तृच् + ङीप् । ) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागाख्यः, पुं, ( नाग एव आख्या यस्य । ) नागकेशरः । इति त्रिकाण्डशेषः ॥

नागाह्वला, स्त्री, नागयष्टिः । इति जटाधरः ॥

नागाङ्गना, स्त्री, हस्तिनी । ( नागस्येव अङ्गनं लघ्यावर्त्तं यस्याः । ) नागयष्टिः । इति मेदिनी । ने, १८८ ॥

नागाधिपः, पुं, ( नागानां अधिपः । ) अनन्तः । इति हेमचन्द्रः । ४ । ३७३ ॥

नागान्तकः, पुं, ( नागानां अन्तको विनाशकः । ) गरुडः । इत्यमरः । १ । १ । ३१ ॥

नागारातिः, पुं, ( नागानां अरातिः शत्रुः । ) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागालाबुः, स्त्री, ( नाग इव अलाबुः । ) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

नागाशनः, पुं, ( अश्नातीति । अश + ल्युः । नागानां अशनो भक्षकः । ) गरुड़ः । इति हारावली । १० ॥

नागाह्वं, क्ली, ( नागस्य आह्वा नाम आह्वा यस्य । ) हस्तिनापुरम् । इति त्रिकाण्डशेषः ॥

नागाह्वा, स्त्री, ( नागं नागकेशरं आह्वयते स्पर्द्धते इति । आ + ह्वे + अच् । टाप् । ) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

नागी, स्त्री, ( नागस्य स्थूला पत्नी । नाग + जानपदेति स्थौल्यार्थे ङीष् । ) नागपत्नी । इति मुग्धबोधम् ॥ ( अस्याः दधिगुणा यथा,—
"लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ।
कषायानुरसं नाग्या दधि वर्च्चो विवर्द्धनम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

नागोदं, क्ली, ( नागवदुदरं यस्मात् । पृषोदरादित्वात् रलोपः । ) उदरत्राणम् । इति हेमचन्द्रः । ३ । ४३२ ॥

नागोदरं, क्ली, ( नागवत् दृढदुदरं यस्मात् । ) उरस्त्राणम् । इति हारावली । १६८ ॥ ( गर्भिण्या गर्भोपद्रवविशेषः । यथा, सुश्रुते शरीरस्थाने । १० अध्याये ।
"शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मापयत्युदरं तत् कदाचित् यदृच्छया उपशान्तं नैगमेषापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः । तत्रापि लीनवत् प्रतीकारः ॥")

नाचिकेतः, पुं, नचिकेताः । अग्निः । यथा,—
"स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तꣳ श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥
प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतं निहितं गुहायाम् ॥
लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्त-
मथास्य मृत्युः पुनराह तुष्टः ।
तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥
त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मयज्ञं देवमीड्यं विदित्वा
निचाय्येमाꣳ शान्तिमत्यन्तमेति ॥
त्रिणाचिकेतस्त्रयमेतद्विदित्वा
य एवं विद्वाꣳश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य
शोकातिगो मोदते स्वर्गलोके ॥"
इति कठोपनिषदि प्रथमा वल्ली । १३-१८ ॥
( ऋषिविशेषः । अस्य विवरणं यथा, महाभारते । १३ । ७१ । २—२१ ।
"अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्व्वाक्यं नाचिकेतस्य चोभयोः ॥
ऋषिरुद्दालकिर्दीक्षामुपगम्य ततः सुतम् ।
त्वं मामुपचरस्वेति नाचिकेतमभाषत ॥
समाप्ते नियमे तस्मिन् महर्षिः पुत्त्रमब्रवीत् ।
उपस्पर्शनशक्तस्य स्वाध्यायाभिरतस्य च ॥
इध्मा दर्भाः सुमनसः कलसश्चातिभोजनम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥
गत्वानवाप्य तत् सर्व्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येव पितरं सोऽब्रवीन्मुनिः ॥
क्षुत्पिपासाश्रमाविष्ट ऋषिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्त्रमशपत् स महातपाः ॥
तथा स पित्राभिहितो वाग्वज्रेण कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥
तस्य दुःखपरीतस्य स्वं पुत्त्रमनुशोचतः ।
व्यतीतं तदहःशेषं सा चोग्रा तत्र शर्व्वरी ॥
पित्र्येणाश्रुप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्पन्दच्छयने कौश्ये वृष्ट्या शस्यमिवाप्लुतम् ॥
स पर्य्यपृच्छत्तं पुत्त्रं श्लाघ्यं पर्य्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥
अपि पुत्त्र जिता लोकाः शुभास्ते स्वेन कर्म्मणा ।
दिष्ट्या चासि पुनः प्राप्तो न हि ते मानुषं
वपुः ॥
प्रत्यक्षदर्शी सर्व्वस्य पित्रा पृष्टो महात्मना ।
स तां वार्त्तां पितुर्म्मध्ये महर्षीणां न्यवेदयत् ॥
कुर्व्वन् भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहैमभासम् ॥
दृष्ट्वैव मामभिमुखमापतन्तं
देहीति स ह्यासनमादिदेश ।